'समानो मन्त्रः समितिः समानी'

# UNIVERSITY OF NORTH BENGAL

B.A. Honours 3rd Semester Examination, 2022

## CC5-SANSKRIT (305)

Time Allotted: 2 Hours | Full Marks: 60

*The figures in the margin indicate full marks.*

विभाग-क

1. संस्कृतभाषया देवनागरीलिप्या च एकस्योत्तरं प्रदेयम्। 12×1 = 12

(क) श्रीमद्भगवद्गीतायाः कर्मयोगमाश्रित्य स्वधर्मं विवृणुत।

(ख) श्रीमद्भगवद्गीतामाश्रित्य निष्कामकर्मविषये प्रबन्धमेकं लिखत।

2. संस्कृतेन एकस्य व्याख्या कार्या। 6×1 = 6

(क) कर्मणैव हि संसिद्धिमास्थिता जनकादयः।
लोकसंग्रहमेवापि संपश्यन् कतुमर्हसि॥

(ख) प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः।
अहङ्कारविमूढात्मा कर्ताहमिति मन्यते॥

3. बङ्गभाषया आङ्गलभाषया वा अनुवादः कार्यः। (द्वयोः) 3×2 = 6

(क) लोकेऽस्मिन् द्विविधा निष्ठा पुरा प्रोक्ता मयानघ।
ज्ञानयोगेन सांख्यानां कर्मयोगेन योगिनाम्॥

(ख) यद्यदाचरति श्रेष्ठः तत्तदेवेतरो जनः।
स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते॥

(ग) यज्ञशिष्टाशिनः सन्तो मुच्यन्ते सर्वकिल्विषैः।
भुञ्जते ते त्वघं पापा ये पचन्त्यात्मकारणात्॥

4. संस्कृतेन द्वयोः संक्षिप्तोत्तरं प्रदेयम्। 3×2 = 6

(क) 'सहयज्ञाः' –इति पदस्य कोऽर्थः ?

(ख) प्रकृतिजाः त्रयो गुणा के ? तेषाञ्च किं वैशिष्ट्यम् ?

(ग) के केनोपायेन संसिद्धिमास्थिताः ?

विभाग-ख

5. प्रश्नमेकं समाधत्त। 12×1 = 12

(क) बृहदारण्यकोपनिषदमाश्रित्य आत्मनः स्वरूपं विवृणुत।

(ख) उपनिषद्वर्णितबन्धस्य कारणं आत्मज्ञानलाभोपायञ्च विस्तारेण आलोचयत।

6. संस्कृतेन एकस्य व्याख्या कार्या। 6×1 = 6

(क) मनसैवानुद्रष्टव्यं नेह नानास्ति किञ्चन।
मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति॥

(ख) आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः।

7. द्वयोः अनुवादः कार्यः। 3×2 = 6

(क) अनन्दा नाम ते लोका अन्धेन तमसावृताः।
तांस्ते प्रत्याभिगच्छन्ति अविद्वांसोऽबुधो जनाः॥

(ख) यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिताः।
अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते॥

(ग) सा होवाच याज्ञवल्क्यः प्रिया वै खलु नो भवती
सती प्रियमवृधद्धन्त तर्हि भवत्येतद्व्याख्यास्यामि
ते व्याचक्षाणस्य तु मे निदिध्यासस्व इति॥

8. संस्कृतेन द्वयोः संक्षिप्तोत्तरं प्रदेयम्। 3×2 = 6

(क) बृहदारण्यकोपनिषद् इति नामकरणस्य तात्पर्य्यं किम् अस्ति ?

(ख) का आसीत् मैत्रेयी ? जनकमैत्रेयीसम्बादे तस्याः मूलवक्तव्यविषयः कः ?

(ग) विद्याऽविद्यायाः फलं किमस्ति ?

——×——